वैदिकविश्वबन्धुत्वं एवं शान्तिः

प्रो. डो. योगिनी हिमांशु व्यास

एतद्देशस्य भारतस्य महत्सौभाग्यमास्ते यत् अत्र विश्वस्य प्राचीनतममतिविपुलं सुसमृद्धं संसारस्य अज्ञानान्धकारापहं विश्वकल्याणविधायकं वैदिकवाङ्मयं विद्यते। वेदाः विधिज्ञानविज्ञान राशयः कर्तव्याकर्तव्यबोधकाः जीवनपथप्रदर्शकाः आचारसञ्चारकाः संस्कृतेराधाररूपाः शुभाशुभनिदर्शकाः विश्वहितसम्पादकाः ऐहिकामुष्मिकसकलविधश्रेयसां संसाधकाः विश्वशान्तिसाधकाः ज्ञानालोकप्रसारकाः सत्यासत्यतायाः तरणयः नैराश्यविनाशकाः चतुर्वर्गावाप्तिसोपानस्वरूपाः विश्वस्य पुरतः विराजन्ते। सर्वेऽपि विद्वत्तल्लजाः दार्शनिकाः आचारविचारशिक्षणप्रवराः स्मृतिकाराः शब्दतत्त्वमीमांसकाः वैयाकरणाः अन्ये च विविधशास्त्रकाराः वेदानां परमप्रामाण्यमङ्गीकुर्वन् वेदेषु मानवजीवनदर्शनतत्त्वानि पश्यन्ति। आचारशिक्षादृष्ट्या नैतिकजीवनदर्शनरूपेण च वेदानामतिमहत्वपूर्णं स्थानं वर्तते। किं कर्म किमकर्मेति प्रश्ने समुपस्थिते वेदा एवादर्शरूपेण प्रस्तूयन्ते।

श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन् हि मानवः।
इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम्।।[1]

भारतवर्षं शाश्वतनीतिनिचयस्य मूलाधारः, सदाचारस्य अभ्यासभूमिः, सत्यस्य तथा तितिक्षायाः शिक्षासदनम्। सर्वज्ञानमयो वेदो हि अखिलभारतीयसभ्यतायाः, संस्कृतेश्चोद्गता। वसुधैव कुटुम्बकम्, स्वस्ति पन्थामनु चरेम[2], आ नो भद्राः क्रतवो यन्तु विश्वतः[3], तन्मे मनः शिवसङ्कल्पमस्तु[4], मित्रस्य चक्षुषा समीक्षामहे[5], ऋतस्य पन्था प्रेत[6], मधुमतीं वाचमुदेयम्[7], सर्वमेव शमस्तु नः[8], माता भूमिः पुत्रोऽहं पृथिव्याः[9], ऋचा वरेण्यं अवो यामि[10], मन्त्रश्रुत्यं चरामसि[11] इति मर्मवाणी भारतमृत्तिकाया एव समुद्भूता। सत्संस्कारो यथार्थशिक्षाबलेन हि लब्धुं शक्यते, यदाश्रित्य पृथिव्यां सर्वेषां सौभ्रातृत्वं चरितसौन्दर्यं च संघटितं भवितुमर्हति, एतत् निगूढं तत्त्वं भारतस्य ऋषिभिः कविदार्शनिकादिभिः सम्यक् अनुभूतम्। विश्वकल्याणाय विश्वप्रेमपरिवर्धनं, कर्तव्यनिर्वहणं, आरोग्यपरीक्षणं, स्त्रीणामादरणं, न्यायमार्गेण धनोपार्जनं, सत्यभाषणं, सत्सङ्गमः, सुपथगमनम् इत्याद्यंशाः सर्वदोपयुक्ताः भवन्तीति वैदिकसाहित्यं विज्ञापयति।

वेदाः स्वकीयोपदेशमाध्यमेन, देवाराधनज्ञापनेन, यज्ञमाध्यमेन, रोगपापशमनार्थवैदिकानुष्ठानेन स्वकीयोक्तनियमपरिपालनेन शान्तिबोधकमन्त्रमाध्यमेन च विश्वशान्तिं परिपालयन्ति। विश्वशान्तिकामनायै ऋषिः अथर्ववेदे कथयति-

शान्ता द्यौः शान्ता पृथिवी शान्तमिदमुर्वन्तरिक्षम्।
शान्ता उदवन्तीरापः शान्ता नः सन्त्वोषधीः।।[12]

यदा यदापि राष्ट्राणां मध्ये महायुद्धमभूत्तदा तदा तत्राज्ञानता एव मूलम्। तत्र वेदस्याध्यात्मज्ञानं विना भौतिकविज्ञानं विश्वसंरक्षणाय नालम्। अतः विश्वशान्तिस्थापनायै भौतिकविज्ञानेन सह अध्यात्मज्ञानमपि नितरामावश्यकमिति। भारतदेशोऽयं जगद्गुरुरूपोऽस्ति पवित्रतमोऽयं भारतदेशः कर्मभूमिरिति चिरात्परिगण्यते। कस्यापि देशस्य समाजस्य वा पवित्रतायां देशसमाजान्तर्गतैरनुष्ठीयमानं कर्मैव कारणम्। कायेन मनसा वाचा चोच्चावचानि कर्माणि मानवैः क्रियन्ते। तानि दुष्कृतान्यपि भवेयुस्सुकृतान्यपि। सुकृतदुष्कृततत्त्वयोर्निर्णयो बुद्धिमता मानवेन कर्तव्यः। कर्माचरणेनैव वृत्तं (चारित्र्यं) सिद्ध्यति। किं सुकृतं किं वादुष्कृतम्? किं सुवृत्तं किं वा दुर्वृत्तमिति सर्वो मानवो विचिकित्सते। तत्रैतन्निर्णयाय श्रुतिस्मृतिस्सदाचार आत्मनस्तुष्टिरेव च इति सन्ति साधनानि। अत एव भारतदेशं प्रति कथितम्। यथा-

अत्रापि भारतं श्रेष्ठं जम्बूद्वीपे महामुने।
यतो हि कर्मभूरेषां ततोऽन्या भोगभूमयः।।
अत्र जन्मसहस्राणां सहस्त्रैरपि सोत्तमः।
कदाचिल्लभते जन्तुर्मनुष्यं पुण्यसञ्चयात्।।[13]

राष्ट्रमुन्नेतुं कीदृशाः जनाः ऋतवः पर्जन्याः कामाः स्युरित्याकांक्षायां यथा राष्ट्रसूकतमन्त्रः निर्दिष्टः-

आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे पर्जन्यः शूर इषव्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे-निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो न कल्पताम्।[14]

अध्यात्मस्य महत्वपूर्णं घटकं मनो वर्तते। उक्तं हि योगवासिष्ठे यत् मन एव मनुष्याणां कारणं बन्धमोक्षयोः। तात्विकदृशा मनः सर्वत्र सृष्टिकारणत्वेन गीतम्। ऋग्वेदस्य अस्मिन् प्रसिद्धे मन्त्रे समनस्त्वस्यादर्शः जगतः मनुजानां सहभावनायाः साहचर्यस्य वा पराकाष्ठां प्राप्नोति।

समानी व आकूतिः समाना हृदयानि वः।

समानमस्तु वो मनो यथा वः सुसहासति।।[15]

परस्परं द्वेषरहिताः सौमस्यभावेन सभासमित्योः सदस्यानामैकमत्यमुत्कर्षाय आवश्यकं मतम्। अथर्ववेदे भावनेयं स्पष्टीकृता-

सभा च मा समितिश्चावतां प्रजापतेर्दुहितरौ संविदाने।

येना सङ्गच्छा उप मा स शिक्षाच्चारु वदानि पितरः सङ्गतेषु।।

विद्म ते सभे नाम नरिष्ठा नाम वा असि।

ये ते के च सभासदस्ते मे सन्तु सवाचसः।।[16]

अपि च

सर्वे नन्दन्ति यशसागतेन सभासाहेन सख्या सहायः।[17]

अयं मन्त्रोऽपि विश्वशान्त्यै भ्रातृभावनायाः आदर्शं निरूपयति-

अज्येष्ठासो अकनिष्ठास एते सं भ्रातरो वावृधुः सौभगाय।[18]

एकतो वैदिककाव्यं कुटुम्बे, राष्ट्रे, समाजे, समग्रे संसारे च सामञ्जस्यं संस्थाप्य विश्वकुटुम्बस्यादर्शं सन्दधाति, अपरतश्च तद् धर्मार्थयोः, श्रेयःप्रेयसोः लोकपरलोकयोः समन्वयं साधयित्वा मानवजीवने सन्तुलनं स्थापयति। तदानीन्तने वैदिकलोकजीवने सहावस्थानस्य सहभोजनस्य सहाध्ययनस्य सहचारस्य च प्रचारः दृश्यते। यथा-

मोघमन्नं विन्दते अप्रचेताः सत्यं ब्रवीमि वध इत् स तस्य।

नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी।।[19]

अपि च-

ओं सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्वि नावधीतमस्तु मा विद्विषावहै। ओं शान्तिः शान्तिः शान्तिः।[20]

पारस्परिकसौमनस्यस्य कृते वैदिकः ऋषिः ब्रूते-

अनुव्रतः पितुः पुत्रो मात्रा भवतु संमनाः।

जाया पत्ये मधुमतीं वाचं वदतु शान्तिवाम्।।[21]

एकः भ्राता स्वस्य अपरस्य भ्रातुः तथैव एका भगिनी अन्याः भगिन्याः द्वेषं न कुर्यादिति मङ्गलभावना अपि वेदेषु निरूपिता अस्ति। तद्यथा-

मा भ्राता भ्रातरं द्विक्षन् मा स्वसारमुत स्वसा।

सम्यञ्चः संव्रता भूत्वा वाचं वदत भद्रया।।[22]

अखिलं विश्वं सौमनस्यभूषितं जन्मभूमिरतिरतं सहजसंवेदनासम्प्रोतं भवेदिति शुभाशंसापि वेदेषु उपलभ्यते। तद्यथा-

समानो मन्त्रः समितिः समानी समानं मनः सहचित्तमेषाम्।
समानं मन्त्रमभिमन्त्रये वः समानेन वो हविषा जुहोमि।।[23]

वैदिकवाङ्मयं भारतस्य गौरवं दिक्षु प्रसारयन् चकास्तितराम्। अस्माकं भारतीयानां सुदृढोऽयं विश्वासः यत् यावन्त उदात्तभावाः सन्ति, ते सर्वेऽपि चतुर्षु वेदेषु क्वचित् सूत्ररूपेण क्वचिच्च विशदरूपेण प्राप्यन्ते। राष्ट्रियतायाः भावनेयं सर्वप्रथमं चतुर्षु वेदेष्वेव दृष्टिपथमुपैति। अथर्ववेदस्य भूमिसूक्तं पाठं पाठं श्रावं श्रावं या कस्य हृदि विश्वशान्तिभावना नोत्पद्यते। अस्माकं भारतीयानां मतमिदं सर्वथा सत्यं, यत् यादृशी विश्वशान्तिभावना वा राष्ट्रियभावना अथर्ववेदस्य पृथिवीसूक्ते विद्यते न तादृशी अन्यस्मिन् कस्मिन्नप्यन्यभाषाविरचिते साहित्ये। अस्माकं वैदिकवाङ्मये राष्ट्रशब्दः वैदिकैः ऋषिभिः वारं वारं प्रयुज्यते। स्वराज्यस्योद्घोषोऽपि अर्चन् ननु स्वराज्यम्, कृण्वन्तो विश्वमार्यम्[24], सा प्रथमा संस्कृतिः विश्ववारा, वयं राष्ट्रे जागृयाम पुरोहिताः[25] इति वेदस्योद्घोषः आर्याणां प्रथमसंस्कृतेर्विश्वस्मिन् विश्वे प्रतिष्ठितस्य रूपान्तरेण प्रचलितस्य सांस्कृतिकविभागस्य समुद्घोषः।

स्वस्ति साम्राज्यं भौज्यं स्वराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यमाधिपत्यं समन्तपर्यायी स्यात्। इति मन्त्रे वैदिकर्षीणां घोषणा विश्वकल्याणकारिणी अस्ति।

विश्वबन्धुत्वविषये वेदानां शिवसङ्कल्पं समुपश्रुत्य आकर्ण्य वा अधुना भारतीयविद्वन्मत्तलतिकानां तत्त्वचिन्तकानां अभिप्रायोऽपि विचारणीयोऽस्ति। तद्यथा प्रथमः श्री रवीन्द्रनाथटागोरमहाभागः कथयति स्म यत्-

'The way of peace requires that men and nations should recognise their common humanity and use weapons of integrity, patience, understanding and love. Where the mind is without fear and the head is held high; where the world has not been broken of into fragments by narrow domestic walls; where the mind is led forward by the ever widening thought and action, into that heaven of freedom, my Father, let my country awake.

स्वामी विवेकानन्दानां चिन्तनमपि महत्वपूर्णमस्ति।

'Help and not Fight, Assimilation and not Destruction, Harmony and peace and not Dissension.'

डा। राधाकृष्णन् महाभागानां भावनापि द्रष्टव्या।

'Wars, before they are actually projected on the battle field, first appear in the mind of person.'

मनोयुद्धस्य निवारणार्थे मैत्री-करुणा-मुदिता-उपेक्षादीनां ग्रहणमावश्यकमस्ति।

विश्वशान्त्यै नोबलपुरस्कारेण सम्मानितानां Thomas Woodrow Wilson महाभागानां मतमप्युल्लेखनीयं वर्तते। तद्यथा-

The cause of peace and the cause of truth are of one family. Even as those who love science and devote their lives to physics and chemistry, even as those who create new and higher ideals for mankind in literature, even so with those who love peace, there is no limit set. Whatever has been accomplished in the past is petty compared to the glory of the promise of the future.

नारीमर्चिकया मधर टेरेसा महाभागया विश्वशान्त्यै षड्विधः मार्गः आदिष्टोऽस्ति।

1. Silence before god.
2. The fruit of silence is prayer.
3. The fruit of prayer is faith.
4. The fruit of faith is love.
5. The fruit of love is service.
6. The fruit of service is peace.

नूनं क्रान्तदर्शिभिर्वैदिकर्षिभिः पुरा प्रणीतं वैदिकवाङ्मयं सार्वकालिकं सार्वभौमिकञ्च महत्वं बिभर्ति। विश्वसौहार्दस्थापनं विश्वमानवश्रेयस्करत्वं वै तन्मूलमन्त्रत्वेन मतम्। अस्माकं मातेव श्रुतिः बाल्यकौमारयौवनवार्धकास्ववस्थासु विभिन्नमधिकारिभेदेन ज्ञानस्तन्यं पाययन्ती विलसति। ईदृशस्य स्तन्यस्य पातारो मातुर्हृदयवन्तो भवन्ति। आसीन्मङ्गलमयः कश्चन कालः यत्र च स्वस्वाधिकारानुसारेण ऐहिकानि ऐहिकसंवलितामुष्मिकाणि च फलान्युपभोक्तुं तदनुकूलानि मात्रा श्रुत्योपदिष्टानि श्रौतानि स्मार्तानि च कर्माण्याचरन्तो जनास्सुखेन जीवनमनयन्।

आधुनिकयुगे वैदिकवाङ्मयकल्पितानां मानवकल्याणकारकाणां मूल्यानां क्षरणेनैव सर्वत्र वास्तविकसुखशान्त्योरभावः। तेषां मूल्यानां वरणेनैव विश्वमानवः श्रेयोमार्गमनुगन्तुं शक्नोति। विश्वमानवस्य विचारः (Concept of world citizen) ऋग्वेदे यस्य ते

विश्वमानुषः[26] अपि च विश्वमानुषां मरुतां इयक्षसि[27] निरूपितोऽस्ति। वैदिकर्षीणां मनसि यत्र विश्वं भवति एकनीडम्[28] भावनास्ति। अथर्ववेदे[29] कथितमस्ति यत्,

सहृदयं सांमनस्यमविद्वेषं कृणोमि वः।।

पादटिप्पणी

१. मनुस्मृतिः, २।९.

२. ऋग्वेदः ५।५१।१५.

३. तत्रैव १।८९।१.

४. यजुर्वेदः ३४।१.

५. तत्रैव ३६।१८.

६. तत्रैव ७।४५.

७. अथर्ववेदः १६।२।२.

८. तत्रैव १९।१।१४.

९. तत्रैव १२।१।१२.

१०. सामवेदः। ४८.

११. तत्रैव १७६.

१२. अथर्ववेदः १९।९।१.

१३. विष्णुपुराणम्.

१४. यजुर्वेदः २२।२२.

१५. ऋग्वेदः १०।१९१।४.

१६. अथर्ववेदः ७।१३।१-२.

१७. ऋग्वेदः १०।७१।१०.

१८. तत्रैव ५।६०।५.

१९. तत्रैव १०।११७।६.

२०. कठोपनिषत्.

२१. अथर्ववेदः ३।३०।२.

२२. तत्रैव ३।३०।३.

२३. ऋग्वेदः १०।१९१।३.

२४. तत्रैव ९।६३।५.

२५. यजुर्वेदः ९।२३.

२६. ऋग्वेदः ८।४५।४२.

२७. तत्रैव ८।४६।१६.

२८. यजुर्वेदः ३२।८.

२९. अथर्ववेदः ३।३०।१.